मिथिलाविद्यापीठग्रन्थमाला
प्राचीनाचार्यग्रन्थावलौ चतुर्दश पुष्पम्

लक्षणावली

श्रीमदुदयनाचार्यकृता

स्वकृतव्याख्यया सनाथीकृत्य
विद्यावाचस्पतिना श्रीशशिनाथझाशर्मणा
मिथिलाविद्यापीठस्थेन सम्पादिता

मिथिलासंस्कृतविद्यापीठप्रधानेन प्रकाशिता

मूल्यं २.७५ रुप्यकाः

मिथिलाविद्यापीठग्रन्थमाला

प्राचीनाचार्यग्रन्थावली
चतुर्दश पुष्पम्

साधारणसंपादकः
डः श्रीशीतांशुशेखरवागचिः,
एम्. ए., एल्. एल्. बी., डि. लिट्,
पीठाध्यक्षः

मिथिलाविद्यापीठग्रन्थमाला
प्राचीनाचार्यग्रन्थावली
चतुर्दशपुष्पम्

श्रीमदुदयनाचार्यकृता

लक्षणावली

भट्टकेशवकृतप्रकाशसहित

विद्यावाचस्पतिना
श्रीशशिनाथझाशर्मणा
मिथिलाविद्यापीठस्थेन
सम्पादिता

मिथिलाविद्यापीठप्रधानेन प्रकाशिता

शकाब्दाः १८८४ विक्रमाब्दाः २०२० ऐसवीयाब्दाः १९६३

All rights reserved

Text printed by Sri Binda Prasad for Darbhanga Press Company (Private) Limited, and Cover, Introduction etc. printed at the Tara Printing Works, Varanasi and Published by Dr. Sitansusekhar Bagchi, Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga.

1963

Mithila Institute Series

ANCIENT TEXT No. 14

LAKṢAṆĀVALĪ

OF

UDAYANĀCĀRYA

With the PRAKĀŚA of BHAṬṬAKESAVA

Edited By

VIDYĀVĀCASPATI

SRI SASINATHA JHA

Traditional Pandit, Mithila Institute

DARBHANGA

THE INSTITUTE,

DARBHANGA

1963

THE GOVERNMENT OF BIHAR established the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object *inter alia* to promote advanced studies and research in Sanskrit learning, to bring together the traditional Pandits with their profound learning and the modern scholars with technique of research and investigations and publish works of permanent value to scholars. This Institute is one of the six started by this Government as a token of their homage to the tradition and scholarship for which ancient Bihar was noted.

Apart from the Mithila Institute, the Nalanda Institute of Post-Graduate Studies and Research in Pali and Buddhist Learning at Nalanda, the Vaisali Institute of Post-Graduate Studies and Research in Jainism and Prakrit Learning at Vaisali, the K. P. Jayaswal Research Institute, the Institute of Post-Graduate Studies and Research in Arabic & Persian and the Bihar Rashtra Bhasha Parishad for Research and advanced Studies in Hindi at Patna have been established and are doing useful work.

In the establishment of the Mithila Institute the State-Government received a generous donation from the late Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.

As part of this programme of rehabilitating and reorientation of ancient learning and scholarship, the editing and publication of this volume has been undertaken with co-operation of scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the world of scholarship and learning would bear fruit in the fulness of time.

INTRODUCTION

Among the works of Udayanācārya the *Lakṣaṇāvali* occupies an important position. It gives clear-cut definitions of the Vaiśeṣika categories with their sub-divisions. It is the earliest extant Lakṣaṇa work having influenced the later Vaiśeṣika authors to a great extent. It has been quoted in authoritative works like the *Sarvadarśanasaṃgraha* attributed to Mādhavācārya. It has given *abhāva* an independent place in the Vaiśeṣika categories. A number of commentaries on this treatise were written. That by Śeṣa Śāraṅgadhara (1500 A. D.) called the *Nyāyamuktāvali* was edited by Pt. Surendralal Goswamin and published from Vārāṇasī (1900 A.D.). The second commentary available in print (Darbhanga, 1822 Śak) is the *Lakṣaṇāvaliprakāśa* by Visvanath Jha. The commentary of Mādhava Somayājin is reported to exist in manuscript. The *Lakṣaṇāvaliprakāśa* of Bhaṭṭa Keśava of the famous Laugakṣi family was so long available in a manuscript and the text of Udayana's *Lakṣaṇāvali* along with this *Prakāśa* is now presented to the students of the Vaiśeṣika system. The commentary is brief but lucid. It is expected that it will help the students to understand the rather stiff phraseology of Udayana.

The author of the *Lakṣaṇāvali* is the famous Nyāyācārya Udayana of Mithilā. He is respected as the incarnation of Lord Śaṅkara, the presiding deity of the Nyāya-Vaiśeṣika system. The Mithila Institute has undertaken the onerous duty of publishing the works of this Ācārya. (1) The *Lakṣaṇamālā* defining the Nyāya categories along with an original commentary in Sanskrit by Pt. Sasinatha Jha, the editor of the present treatise, has already been published. (2) The present volume consists of, as we have already pointed out the text of the *Lakṣaṇāvali* of Udayana with the commentary of Bhaṭṭa Keśava. (3) The *Ātmatattvaviveka* refutes the post-Dharmakīrti Buddhist arguments against the soul theory of the Naiyāyikas and proves the existence thereof. (4) The *Nyāyakusumāñjaliprakaraṇa* establishes the supreme creator of the world after refuting the arguments of non-theistic schools. This is now in the press with the commentaries of Varadarāja, Śaṅkara and Guṇānanda not completely published so far. (5) The *Kiraṇāvali,* a commentary

on the *Padārthadharmasaṃgraha,* though incomplete commands great respect in the field of Vaiśeṣika philosophy.[1] (6) The *Nyāyapariśiṣṭa* or *Prabodhasiddhi* is an independent exposition of Udayana on the last chapter of the *Nyāyasūtras* of Gotama. It has been published in the Calcutta Sanskrit Series. There are reasons to believe that this work covered the entire *Nyāyadarśana* and the first four chapters of it are lost, perhaps irreperably. (7) Lastly the *Nyāyavārtikatātparyapariśuddhi* on the *Nyāyavārtikatātparyaṭīkā* of Vācaspati Miśra. It has been partly published in the Bibliotheca Indica series. The complete *Pariśuddhi* along with the *Nyāya-sūtra,* the *Nyāyabhāṣya,* the *Nyāyavārtika,* the *Tātparyaṭīka* and the *Alaṃkāra* of Abhayatilaka is now awaiting publication in the Mithila Institute Series.

The *Lakṣaṇāvali* must have been one of the earliest works of Udayana. The most important point in this work that attracted the notice of the students of Indian philosophy so long, is the mention of the date of its composition (*Tarkāmbarāṅka śaka*). But serious objections have been put forward against this date of Udayana. The verse in question occurs in one manuscript only. There too, the reading is doubtful.[2] No commentator, including Keśavabhaṭṭa has taken any notice of it.

The Commentator, Keśavabhaṭṭa, was a famous scholar and poet with a number of contributions to his credit. We could gather some details about him and his works. He was born of the celebrated Laugākṣi family of Mādhyandina Śākhā of white *Yajurveda,* and his native place was *Puṇyastambha* on the Godāvari (Godātaṭaprollasat-Puṇyastambhanivāsin—*Nṛsimhacampū* Col. Tanjore Edn.) and enjoyed the patronage of king Umapati Dalapati at whose request he composed this campu.[3] Bhaṭṭa Keśava, the senior, a repository of the Nyāyaśāstra was the grand-father of our commentator. He attracted students

1. Generally it is supposed that it ended with the *Buddhiprakaraṇa.* But Dr. J. S. Jetly informs us that his edition of the work will include a newly discovered portion also.

2. Bhattacharya: *History of Navya-Nyaya in Mithila,* pp. 51-4.

3. Cf. इति श्रीमन्महाराजाधिराजस्पृहनीययशऔदार्यधैर्यगाम्भीर्याद्यनेकानवद्यगुणगणविराजमानश्रीमदुमापतिदलपतिराजोद्द्योतितभट्टकेशवविरचिते चम्पूकाव्ये पञ्चमः स्तवकः।
Colophon: Ms. No. 10039, Trivandrum Oriental Manuscripts Library.

from all parts of the country. Bhaṭṭa Ananta a devotee of Lord Śiva was the father of this commentator.[1]

Over and above the *Nṛsiṃhacampū* also called *Prahlādacampū* just mentioned, Bhaṭṭa Keśava is reported to have written one *Ānanda-vṛndāvanacampū* also.[2] A lyric poem, the *Lāvaṇyalaharīkāvya* in praise of the mother Goddess Durga is also attributed to him.[3]

In the field of Philosophy, Bhaṭṭa Keśava contributed to several systems :

1. The *Sāṃkhyatattvapradīpikā* on the Sāmkhyasūtras by one Bhaṭṭa Keśava, son of Sadānanda and grandson of Baṭṭa Keśava is reported to have been extant in three manuscripts. Here Sadānanda seems to be a mistake for Bhaṭṭānanta.[4]

2. The *Mīmāmsārthaprakāśa* has been published from Vizagapattam (1913). Here the post-colophon statement points to the fact that this Mīmāmsā treatise was written at Vārāṇasī and was dedicated to Lord Viśveśvara and Goddess Durgā.[5] The second initial verse describes the author as well-versed in the *Yajurveda*.[6]

3. The *Nyāyacandrikā*, a Nyāya primer, has been edited by Surnad P.N. Kunjan Pillai and published in the University of Kerala Sanskrit Series, No. 189, in 1958. It was also dedicated to Lord Śiva at Vārāṇasī.[7]

---

1. यच्छिष्यैर्जगतीतलं परिवृतं यस्तर्कविद्यामयः
 श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनिः केशवः ।
 यं प्रासूत सदाशिवाङ्घ्रिकमलद्वन्द्वैकनिष्ठं परं
 भट्टानन्तमहं नमामि पितरं साम्बं कृपाम्भोनिधिम् ॥
 Lakṣaṇāvali, p. 1. This verse occurs in many other works of this author.
2. Cf. Cat. Cat. Vol. I, p. 127. The colophons of almost all the works attributed to Bhaṭṭa Keśava attest this pedigree.
3. *Ibid*, Vol. III, p. 115. 4. *Ibid*, Vol. I, p. 127.
5. वचनामृतधारयानया ननु काशीमधिगम्य केशवः ।
 कृतवानभिषेकमादरादुमया शीतमयूखमालिनः ॥ *Mīmāsārthaprakāśa*, p. 49.
6. याजुषाम्नायविज्ञेन लौगाक्षिकुलजन्मना ।
 भट्टश्रीकेशवेनासौ मीमांसार्थः प्रकाश्यते ॥ *Ibid*, p. 1.
7. सकलन्यायसिद्धान्तमवगम्य यथामति ।
 भट्टश्रीकेशवेनैषा क्रियते न्यायचन्द्रिका ॥ *Nyāyacandrikā*, p. 1.
 श्रावणप्रतिपच्चन्द्रदिने काश्यामयं कृतः ।
 ग्रन्थः श्रीकेशवेनास्मै भवानीपतयेऽर्पितः ॥ *Ibid*, last page.

4. There are two incomplete Mss. of the *Tarkadīpikā* of Keśavabhaṭṭa in the Saraswati Mahal Library, Tanjore (Nos. 6307, 6308). In one of them the verse describing the father and grandfather of Keśavabhaṭṭa is found quoted.

5. *A Padārthacandrikāṭippaṇī* of one Keśavabhaṭṭa exists in two manuscripts at Tanjore.[1] It is a Vaiśeṣika work and is attributed to Keśavabhaṭṭa. Here the initial verse praises Lord Śiva and the concluding one gives the date of its composition—indunetraśarabhūmite śake (=Śaka 1521).

7. The *Saptapadārthaprakāśa* of Bhaṭṭa Keśava has been referred to in the *Lakṣaṇāvaliprakāśa* (asmābhiḥ *Saptapadārthaprakāśe* prapañcitam, p. 1). The same work has again been called *Śivādityaprakāśa* in the *Nyāyacandrikā* (p. 19). It is clear that this is a commentary on the *Saptapadārṭhī* of Śivādityamiśra.

The commentator himself mentions the date of dedication of the *Lakṣaṇāvalīprakāśa* to Lord Viśvanātha at Vārāṇasi as Friday, the second day of the black fortnight of Jyaiṣṭha. The Nyāyacandrikā also was similarly dedicated on a Pratipadā day of Śrāvaṇa. But the omission of the year and the era is a serious defect in both the cases. The lecuna can roughly be filled up if the *Padārthacandrikāṭippaṇī* mentioned above can be proved to be a contribution of this Keśavabhaṭṭa. This Ṭippaṇī gives the date of its composition as indunetraśarabhūmite śake caitrakṛṣṇatapane Vikāriṇi. The year corresponds to A. D. 1599.

Keśavabhaṭṭa was thus a Vedic scholar and contributed to literature, Sāṃkhya, Mīmāmsā, Nyāya and Vaiśeṣika. Detailed studies in his contributions is a desideratum. As regards his religious faith he was devoted to Lord Śiva and Mother Goddess Durgā. It would not be out of place to quote a few of his religious verses here :

(a) आराधकेप्सितफलाधिकदानदक्षा
दाक्षायणी दलितपद्ममनोहराक्षी ।
साकारभाग्यमिव यस्य नमोऽस्तु तस्मै
विश्वेश्वराय भवभीतिभिदे भवाय ॥

Initial Verse, *Nyāyacandrikā*

---

1. Des. Cat. Sans. Mss. Tanjore Saraswati Mahal Library, Vol. XI, Mss. Nos. 5983-4.

(b) चराचरमिदं जगद् यदुदरैकदेशे स्थितं
शिरस्त्रिदिवमम्बरं जलधिरम्बरं यद्वपुः ।
शशिद्युमणिलोचना हुतभुगानना दिक्छ्रुतिः
परात्परतरा हृदि स्फुरतु कापि मूर्त्तिमंम ।।

Initial verse, *Mīmāṃsārthaprakāśa*

(c) जय त्रिपुरमर्दन त्रिगुणसंयुत त्र्यम्बक
त्रिवर्णमय शङ्कर त्रिदशवन्द्य गौरीपते ।
जगत्त्रितयकारण त्रिविधतापसंहारक
त्रिविष्टपधुनीधर त्रिनिगमोपगीत प्रभो ।

Initial verse, *Padārthacandrikāṭippaṇī.*

It is a matter of great regret that the editor of this treatise, Pt. Sasinath Jha was not spared to see it published. A man of character, he devoted himself to the service of the Śāstras and taught different branches of Indian Philosophy in Gujrat and Bihar for more than sixty years. Plain living and high thinking was his motto of life. Only a few of his works are published in his own name. Mention may be made of his *Anyoktisūktāvali*—a collection of verses, *Tritalāvacchedakatāvāda*—an original dissertation on Neo-Logic and the *Lakṣaṇamālāṭīkā*. His *Khaṇḍanasāra* in Sanskrit verses and *Vivecanā* on the *Vyutpattivādatattvāloka* of the Late Dharmadatta (Vaccā) Jha are preserved in manuscripts. As a mark of recognition of his eminent services to the cause of Sanskrit learning, the Akhila Bhāratīya Saṃskrita Sāhitya Sammelana conferred on him the title of Vidyāvācaspati and the Union Government of India honoured him with a certificate. Pt. Śaśinath breathed his last at the ripe old age of eighty three years on the tenth October, 1963 and left a host of students and friends all over the country.

The text of this volume is based on a single paper manuscript preserved in the Oriental Institute, Baroda (Acc. No. 4191). It was received on loan through the good offices of Dr. P. L. Vaidya, M. A., D. Litt, former Director, Mithila Institute.

That the volume now sees the light of the day is due to the keen interest in it evinced by the General editor, Dr. S. Bagchi, M. A., LL. B., D. Litt, Director, Mithila Institute. Thanks are also due to Professor Mahaprabhulal Goswamin M. A. and Sri Sasinath Misra of the Publication Department, Mithila Institute, Darbhanga.

Mahāśivarātri
1964

ANANTALAL THAKUR
Mithila Institute

लक्षणावली

उदयनकृता

[illegible]

[illegible]

लक्षणावली

अपारे तन्त्रेऽस्मिन् दुरधिगमनिःसीमविषये
न यत्नो मे विद्वन्निचयपरिहासाय भवति ।
कृपापूर्णेऽपर्णे सितकिरणवर्णे भगवति
प्रभावोऽयं मातस्तव चरणयोरेव परमः ॥ १ ॥

यच्छिष्यैर्जगतीतलं परिवृतं यस्तर्कविद्यामयः
श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनिः केशवः ।
यं प्रासूत सदाशिवाङ्घ्रिकमलद्वन्द्वैकनिष्ठं परं
भट्टानन्तमहं नमामि पितरं साम्बं कृपाम्भोनिधिम् ॥ २ ॥

सर्वकाणादसिद्धान्तरहस्यज्ञानपूर्वकम् ।
भट्टश्रीकेशवेनैषा व्यज्यते लक्षणावली ॥ ३ ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नसमाप्त्यर्थं कृतमिष्टदेवतानतिस्तुतिरूपं मङ्गलं शिष्यशिक्षायै निबध्नाति –

प्रणम्य पार्वतीनाथं नित्यविज्ञानमीश्वरम् ।
द्रव्यादिसर्वमेयानां करिष्ये लक्षणावलीम् ॥ १ ॥

विशिष्टं ज्ञानं यस्येति विज्ञान इति समासः। विशिष्टं ज्ञानं यस्मादिति वा ॥

पदार्थसामान्यलक्षणमाह—

अभिधेयः पदार्थः । स द्विविधो, भावाभावभेदात् ॥

यथा च केवलान्वयिनोऽपि लक्षणत्वं तथास्माभिः सप्तपदार्थप्रकाशे प्रपञ्चितम् । पदार्थपदप्रवृत्तिनिमित्तं चैतद् । अभिधेयत्वं शब्दशक्तिविषय-

त्वम्। न च विषयत्वमेवास्तु व्यर्थमधिकम्, तावन्मात्र एव तात्पर्यात्, प्रवृत्ति-निमित्तवैयर्थ्याभावाद् वा ॥

तत्र नञर्थविषयत्वरहितप्रत्ययविषयो भावः। स षोढा द्रव्यादि-भेदात् ॥

[तत्र] भावाभावयोर्मध्य इत्यर्थः। घटाभावादावतिव्याप्तिवारणायोक्तं रहितान्तम्। न च घटाभावो नास्तीति [भाव अः] प्रत्ययविषयीभूतघटेऽ-व्याप्तिः, अभावाविषयकप्रत्ययमादायैव लक्षणनिर्वाहात्। यद्यपि नञर्थत्वम-भावत्वं तच्च भावेऽप्यस्ति, तस्यापि स्वाभावाभावत्वादित्यव्याप्तिः, तथापि मुख्या-भावत्वग्रहणान्न दोषः। यद्यप्यभावे मुख्यत्वं भावभिन्नत्वमित्यात्माश्रयः, तथापि भावत्वमखण्डोपाधिरित्यत्रैव तात्पर्यात् ॥

पदार्थानां [२क] तत्त्वज्ञानोपयोगिसाधर्म्यमाह-

तत्रानित्यद्रव्यगुणकर्मसामान्यविशेषाः समवेताः। नित्यद्रव्य-समवायाभावाः समवेतत्वरहिताः। द्रव्यगुणकर्माणि समवेतवन्ति। सामान्यविशेषसमवायाभावाः समवेतरहिताः ॥

अत्र गुणात्यन्ताभावानधिकरणं द्रव्यम् ॥

गुणवद्द्रव्यमित्युक्ते उत्पन्नविनष्टेऽव्याप्तिः, तद्वारणायात्यन्ताभाव-गर्भलक्षणमुपात्तम्। तत्र च गुणप्रागभावसत्त्वेऽपि सहकारिविरहान्न फलो-पधानमिति मतेनेदम्। वस्तुतस्तु, यथोक्तविशेषणविशेष्यभावे न वैयर्थ्यमिति ध्येयम्। न च कालस्य जगदाधारतया तत्राव्याप्तिरिति वाच्यम्, जगदाधारता-नियामकसंबन्धातिरिक्तसंबन्धेन तदत्यन्ताभावानधिकरणस्य विवक्षितत्वात् ॥

मूर्तत्वरहितसमवेतसमवेतत्वरहितमूर्तत्वरहितसमवेतामूर्तत्वरहित-समवेतजातिमद् वा ॥

जातिर्द्रव्यत्वमित्युक्ते गुणत्वे गतम्, अतोऽमूर्तत्वरहितसमवेतेति। एतावत्युक्ते घटत्वे गतम्, अतो मूर्तत्वरहितसमवेतेति। घटत्वं तु मूर्तत्वरहिते

समवेतं न भवतीति न दोषः। एतावत्युक्ते सत्तायां गतम्, अतः समवेतसमवेतत्वरहितेति। एतावत्युक्तेऽसंभवः द्रव्यत्वस्यापि कपालसमवेतघटसमवेतत्वात्, अतो मूर्तत्वरहितेति समवेतविशेषणम्। प्रथमरहितान्तमात्रोक्तौ घटत्वे गतम्, अतो मूर्तत्वरहितसमवेतेति। आत्मत्ववारणाय अमूर्तत्वरहितसमवेतेति। जातिपदस्थाने धर्मत्वोक्तौ घटाकाशगतद्वित्वसंख्यायां गतम्, अतो जातिपदम्। इदं च द्रव्यत्वजातेर्लक्षणम्। तद्वद् द्रव्यमिति द्रव्यलक्षणं सुगमम्॥

गन्धासमवेतगगनारविन्दसमवेतजातिमद् वा॥

जातिर्द्रव्यत्वमित्युक्ते घटत्वादावपि गतम्, अतोऽरविन्दसमवेतेति। एतावत्युक्तेऽप्यरविन्दत्वे गतमतो गगनेति। एवमपि सत्तायां गतम्, अतो गन्धासमवेतेति। अत्र गन्धासमवेतगगनसमवेतजातिर्द्रव्यत्वमित्युक्ते दोषाभावादरविन्दपदं चिन्त्यम्॥

समवेतसमवेतसमवेतत्वं वा॥

समवेतं सामान्यं समवेतसमवेतम्, तत्समवेतं यस्मिन्निति समासः। समवतसमवेतमित्युक्ते गुणादौ गतम्, अतः समवेतपदमित्यर्थः॥

तच्च नवधा भिद्यते, पृथिव्यादिभेदात्। तमो द्रव्यं न भवति, आलोकनिरपेक्षचक्षुर्ग्राह्यत्वादालोकाभाववत्। तमःशब्दवाच्यत्वेन विप्रतिपत्तिविषयतया पक्षत्वम्। आलोकाभावशब्दवाच्यत्वेन संप्रतिपत्तिविपयतया साध्ययोगित्वेन सपक्षत्वम्। इति न पक्षसपक्षयोरैक्यं दोषः। तमःशब्दो द्रव्यवाचको न भवति, आलोकशब्दान्यत्वे सति आलोकनिरपेक्षचक्षुर्ग्राह्यवाचित्वादालोकाभावशब्दवत्॥

ननु तमसोऽपि [ख] द्रव्यत्वात् नवत्वमनुपपन्नमित्याशङ्क्याह तम इति। ग्राह्यत्वादित्युक्ते आत्मनि व्यभिचारः, तद्वारणाय चक्षुःपदम्। एवमुक्ते घटादौ स इति आलोकनिरपेक्षेति। न चालोके व्यभिचारः, तत्रापि विषयतया

तदपेक्षणात् । ननु न्यायमते आलोकाभाव एव तमः, स एव च दृष्टान्त इति पक्षदृष्टान्तयोरैक्यमित्यत आह तमःशब्दवाच्यत्वेनेति । सौकर्यादनुमानान्तरमाह तमःशब्द इति । न चोभयत्राप्यप्रयोजकत्वम्, क्लृप्ताभावपदार्थान्तर्भावे पदार्थान्तरस्वीकारे गौरवस्यैव बाधकत्वात् । न चैवमन्धकाराभाव आलोक इत्येव किं न स्यादिति वाच्यम्, अनन्यथासिद्धोष्णस्पर्शप्रतीत्यनुरोधेन तेजोद्रव्यत्वस्य दुरपह्नवत्वादित्यन्यत्र विस्तरः ॥

तत्र गन्धात्यन्ताभावरहिता पृथिवी । करकासमवेतवाजिविषाणसमवेतजातिमती वा । सा द्विधा नित्यानित्यभेदात् ॥

यद्यपि गन्धवती पृथिवीत्युक्ते न कोऽपि दोषः, प्रथमक्षणविशिष्टेऽपि कदाचिद् गन्धोत्पत्त्या तदव्याप्तेरप्यभावात् । नाप्युत्पन्नविनष्टद्रव्येऽव्याप्तिः, तादृशद्रव्ये मानाभावात् । भावे वा तत्र गन्धानुत्पादेन तत्प्रागभावे मानाभावेन तवाप्यगतेः । तथापि यथोक्तविशेषणविशेष्यभावे न वैयर्थ्यम् । वस्तुतस्तु, गन्धसमवायिकारणतावच्छेदकजातिमत्त्वे तात्पर्यम् । करकासमवेतेति । जातिः पृथिवीत्वमित्युक्ते घटत्वे गतम्, अतो विषाणसमवेतेति । एवं सति विषाणत्वे गतमतो वाजिपदम् । करकासमवेतवाजिसमवेतजातिरित्युक्ते वाजित्वे गतमतो विषाणपदम् । वाजिविषाणोभयगतद्वित्ववारणाय जातिपदम् । न च तेजस्त्वमादाय तैजसादिशरीरेऽतिव्याप्तिः, विषाणं पार्थिवमेवेत्यभ्युपगम्यास्याभिधानात् । यद् वा करकातेजोवाय्वसमवेतेति विवक्षणीयमित्याहुः ॥

नित्यः परमाणुरूपोऽनित्यः कार्यरूपः । पृथिवीत्वं नित्यवृत्ति, घटपटवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिरिति । न च पक्षासिद्धिः, घटो गगनवृत्तित्वरहितपटवृत्तिजातिमान्, घटपटव्यतिरेकित्वरहितत्वाद् पटत्ववदिति तत्सिद्धिः ॥

परमाणुसद्भावे मानमाह पृथिवीत्वमिति, जातित्वादित्युक्ते घटत्वे व्यभिचारः स्यादतः पटवृत्तीति । पटत्ववारणाय घटपदम् । घटपटोभयवृत्ति-

द्वित्ववारणाय जातिपदम्। न चाप्रयोजकत्वम्। [३क] निरुपाधित्वस्यैव विपक्षबाधकत्वात्। पृथिवीत्वे प्रमाणाभावमाशङ्क्य परिहरति न चेति, सत्तामादाय सिद्धसाधनतावारणाय गगनवृत्तित्वरहितेति, घटत्वमादाय सिद्धसाधनवारणाय पटवृत्तीति। घटपटोभयवृत्तिद्वित्ववारणाय जातिपदम्। हेतावसिद्धिवारणाय पटपदम्। दृष्टान्तासिद्धिवारणाय घटपदम्। इदं च व्यासज्यवृत्तिप्रतियोगिकान्योन्याभावानभ्युपगन्तृमते बोध्यम्।

न च सत्ताऽसिद्धिः, गगनं द्रव्यत्वेतरजातिमत्, भूतत्वात् पटवदिति तदनुमानात्। न च द्रव्यत्वासिद्धिः, गगनादिः रूपावृत्तिजातिमान् गुणवत्त्वात् घटवदिति द्रव्यत्वसिद्धिः॥

दृष्टान्ते प्रमाणाभावमाशङ्क्य परिहरति न च सत्ताऽसिद्धिरिति। द्रव्यत्वमादाय सिद्धसाधनतावारणाय द्रव्यत्वेतरेति। शब्दमादाय तद्वारणाय जातिपदम्। साध्यप्रविष्टं द्रव्यत्वं साधयति गगनादीति। साध्ये सत्तामादाय सिद्धसाधनवारणाय रूपावृत्तीति।

कार्यं त्रिविधं शरीरादिभेदेन। तत्र भोगायतनमन्त्यावयवि शरीरम्॥

शरीरादीति। आदिपदादिन्द्रियविषयपरिग्रहः। भोगायतनम् भोगावच्छेदकम्। शरीरावयवेऽतिव्याप्तिवारणायान्त्यावयविपदम्। घटादिवारणाय भोगायतनमिति। न च मरणदशायामुत्पन्नशरीरान्तरेऽव्याप्तिः, तस्यां कदापि भोगायतनत्वाभावादिति वाच्यम्। भोगायतनवृत्त्यन्त्यावयविमात्रवृत्तिजातिमच्छरीरमित्यत्र तात्पर्यात्। एवं च तादृशचैत्रत्वजातेस्तत्र सत्त्वान्नाव्याप्तिः। न च घटादिसम्प्रदायप्रवृत्त्यर्थं परमेश्वरोपगृहीतशरीरेऽव्याप्तिस्तस्य भोगानवच्छेदकत्वादिति वाच्यम्, तदुपासनलब्धतदाकारयोगिशरीरनिष्ठशिवत्वजातिमादाय तत्र लक्षणानुगमनात्। यद्वा शरीरत्वजातिमादायैव तत्र लक्षणानुवृत्तिः। न च पृथिवीत्वादिजातिसाङ्कर्यात् शरीरत्वं न जातिरिति वाच्यम्, घटत्वादिव

तत्तद्व्याप्यस्य नानात्वात्, अन्यथा अतीन्द्रियघटितोपाधित्वे शरीरत्वस्य चाक्षुषज्ञाने विषयत्वं न स्यादित्यन्यत्र प्रपञ्चितम् ॥

शरीरसंयुक्तमपरोक्षप्रतीतिसाधनमतीन्द्रियमिन्द्रियम् ॥

शरीरसंयुक्तमिति अतीन्द्रियमित्युक्ते कालादावतिप्रसङ्ग इति प्रतीतिसाधनत्वमुपात्तम्। तच्च प्रतीत्यसाधारणसाधनत्वम्। एवमपि सामान्यप्रत्यासत्तीभूयालौकिकप्रत्यक्षजनक[निर्विकल्पक]साक्षात्कारादौ गतमिति अपरोक्षपदं लौकिकपरम्। इन्द्रियसन्निकर्षवारणाय संयुक्तपदम्। अतीन्द्रियाधिष्ठानवारणाय शरीरपदम्। आलोकवारणायातीन्द्रियपदम् ॥

नन्वपरोक्षत्वमिन्द्रियजन्यत्वमित्यात्माश्रय इत्यत आह—

ज्ञानकरणजन्यत्वरहितज्ञानत्वमपरोक्षत्वम् ॥

अनुमित्यादौ तु ज्ञानस्यैव करणत्वान्नातिप्रसङ्ग इति भावः। न च मननकरणकचरमसाक्षात्काराव्याप्तिः। अदृष्टाद्वारकस्य करणस्योक्तत्वात्। वस्तुतस्तु, अपरोक्षत्वं साक्षात्त्वम्। तच्च ज्ञानत्वावान्तरजातिविशेष इत्यत्र तात्पर्यम् ॥

अतीन्द्रियत्वं चाज्ञानसाधनत्वम् ॥

यद्यप्यज्ञानसाधनत्वं न ज्ञानेतरसाधनत्वम्, घटादावतिव्याप्तेः। नापि ज्ञानासाधनत्वम्, इन्द्रियेष्वव्याप्तेः। तथापि विषयतया ज्ञानासाधनत्वं तत्त्वम्। न च योगिज्ञाने वर्तमानांशे विषयस्य जनकत्वमिति मतेऽव्याप्तिरिति वाच्यम्, लौकिकसाक्षात्काराविषयत्वे तात्पर्यात् ॥

प्रतीयमानतया भोगसाधनं विषयः। इति पृथिवी ॥

अत्र ज्ञायत इति व्युत्पत्त्या ज्ञानपदं सुखदुःखपरं सुखादिसाधनं विषय इत्युक्तेऽसम्भवः विषयस्य सुखासाधनत्वात् स्वाप्नसंभोगाभावेऽपि तज्ज्ञानात् सुखोत्पत्तेरित्यत उक्तम्—प्रतीयमानतयेति। एतत्पदमहिम्ना च यत्साक्षात्कारः सुखदुःखान्यतरहेतुरित्यर्थो लभ्यते शरीरादेरपि विषयत्वे न दोषः, उपधेयसङ्करे-

अप्युपाधेरसङ्करात्। ननु पार्थिवद्व्यणुकादावव्याप्तिः, न च तस्य न विषयत्वम्। तथा सति नित्यानित्यपृथिव्योरनन्तर्भावप्रसङ्गादिति [४क] चेदत्राहुः—जन्य-पृथिवीत्वे सति शरीरेन्द्रियभिन्नत्वं विषयत्वम्। न चाप्यविषयेऽव्याप्तिः, पार्थिवविषयस्यैव लक्ष्यत्वात्। विषयमात्रस्य लक्षणं नास्त्येव, विषयत्वस्य केवलान्वयित्वात्। पार्थिवादिविषयचतुष्टयसंग्राहकं तु पृथिवीत्वजलत्वतेजस्त्व-वायुत्वान्यतमवत्त्वे सति शरीरप्राणेन्द्रियभिन्नत्वमिति दिक्॥

पृथिवीवृत्तित्वरहितहिमकरकावृत्तिजातिमज्जलम्। तन्नित्यानित्य-भेदेन द्विविधम्॥

करकावृत्तिजातिर्जलत्वमित्युक्ते करकात्वे गतम्। अतो हिमपदम्। एव-मपि सत्तायां गतमतः पृथिवीवृत्तित्वरहितेति। पृथिवीवृत्तित्वरहितहिमवृत्ति-र्जातिर्जलत्वमित्युक्ते हिमत्वे गतमतः करकापदम्। [तादृशजातिमज्जलमिति]॥

नित्यजलं साधयति—

जलत्वं नित्यवृत्ति हिमकरकावृत्तिजातित्वात्, सत्तावदिति तत्सिद्धिः॥

करकात्वे व्यभिचारवारणाय हिमकरकावृत्तिपदम्। हिमकरकान्यान्यत्वे व्यभिचारवारणाय जातिपदम्। न चाप्रयोजकत्वम्, निरुपाधित्वात् गन्धसम-वायिकारणतावच्छेदकतया पृथिवीत्वस्येव स्नेहसमवायिकारणतावच्छेदकतया जलत्वस्य सिद्धिरिति कश्चित्। तन्न, परमाणौ जलत्वानापत्तेः। नित्यस्य स्वरूपयोग्यस्य फलोपधानावश्यम्भावेन सहकारिविरहेणापि कार्याभावस्योप-पादयितुमशक्यत्वात्। जलसमवायिकारणतावच्छेदकतया जलत्वसिद्धिरिति तु तत्त्वम्

जलत्वजातेर्नित्यवृत्तित्वं प्रसाध्य जलत्वजातेरेवासिद्धिरिति शङ्कां परिहरति—

करका गगनवृत्तित्वरहितहिमवृत्तिजातिमती, स्नेहाधिकरणत्वात्, हिमवदिति करकायां तत्सिद्धिः॥

सत्तामादाय सिद्धसाधनता माभूत् अत उक्तम् गगनवृत्तित्वरहितेति। करकात्वमादाय सा मा भूदत उक्तम्—हिमवृत्तीति। हेतौ पृथिव्यां व्यभिचारवारणाय स्नेहपदम्। जलपदशक्यतावच्छेदकत्वेन जलत्वजातिसिद्धिरात्मत्ववत्, असति बाधके शक्यतायाः [४ख] कार्यत्वकारणत्वयोरिव जात्यैवावच्छेदात्। अन्यथा आत्मत्वादेरपि जातित्वे का प्रत्याशेत्यपि बोध्यम्। एवं च सति अदृष्टपदशक्यतावच्छेदकत्वेनादृष्टत्वं कुतो न जातिरिति चिन्त्यमित्यन्ये। तान्त्रिकाणां जातित्वव्यवहाराभावस्यैव तत्र बाधकत्वान्न जातित्वमित्यपरे॥

अनित्यं त्रिविधं शरीरादिभेदेन। शरीरं वरुणलोके। जलपरमाणवः शरीरारम्भका इन्द्रियारम्भकत्वात्, पार्थिवपरमाणुवत्॥

जलपरमाणव इति। अंशतः सिद्धसाधनवारणाय जलपदम्। शरीरारम्भकत्वं च शरीरवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्। एवं हेतावपि॥

इन्द्रियारम्भकत्वं रसनस्याप्यत्वात् सिद्धम्। रसनमाप्यं रूपादिषु मध्ये रसस्यैवाभिव्यञ्जकत्वात्, सक्तुरसाभिव्यञ्जकजलवत्॥

इन्द्रियारम्भकत्वमिति। रसनं स्ववृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्परमाण्वारब्धं जन्यजलत्वात् जलान्तरवदित्यर्थः। रसनमाप्यमिति। अप्रसिद्धिवारणाय रूपादिषु मध्ये इति। मनोव्यावर्तनायैवकारः। ननु रूपरसयोर्मध्ये रसस्यैवाभिव्यञ्जकत्वादित्येवास्तु व्यर्थमधिकम्। न च गन्धरसयोर्मध्य इत्यादिहेतुत्रयमप्यन्यद्बाध्यमिति वाच्यम्, शब्दरसयोर्मध्य इत्यस्य पृथिव्यां व्यभिचारात्। रूपरसयोर्मध्य इत्यादेरपि जलरसाभिव्यञ्जकहरीतक्यादौ व्यभिचाराच्च। तत्र तस्यापि स्वनिष्ठरूपादिव्यञ्जकत्वान्न व्यभिचारः। एवं सति सक्तुरसाभिव्यञ्जकसलिलस्यापि स्वरूपव्यञ्जकत्वेन दृष्टान्तासिद्ध्यापत्तेः। किं चेन्द्रियसन्निकर्षे व्यभिचार इति चेन्न अत्र वदामः। रूपरसयोर्मध्ये रसस्यैवाभिव्यञ्जकेन्द्रियत्वादिति हेत्वर्थः। एवकारमहिम्ना रूपाव्यञ्जकत्वे सति रसव्यञ्जकेन्द्रियत्वं पर्यवसितोऽर्थः। एवं गन्धाव्यञ्जकत्वे सतीत्यादिना हेतुत्रयं बोध्यम्। मनोवारणाय सत्यन्तम्। त्वगादिवारणाय रसव्यञ्जकेति। सन्नि-

कर्षवारणायेन्द्रियग्रहणम्। दृष्टान्तस्तु यथाश्रुतमभिप्रेत्योक्तः। प्रयोगश्चायं केवलव्यतिरेकी, तत्र च घटादिरिवेति [5a] दृष्टान्तः। न चेन्द्रियत्वान्तर्गतभागवैयर्थ्यम्, यत्र यावति न वैयर्थ्यं तत्र तावत एवोपादानादिति दिक्। एवमग्रिमानुमानेष्वपि ॥

रसनसिद्धिस्तु, रसोपलब्धिः करणसाध्या अपरोक्षप्रतीतित्वात् रूपोपलब्धिवदिति। विषयस्तु सरित्समुद्रहिमकरकादिः। न च करकायाः काठिन्यात् पार्थिवत्वमाशङ्कनीयम्, अनन्तरमेव स्वभावापगमादित्यापः ॥

रसविषयकलौकिकसाक्षात्प्रतीतिर्मनोभिन्नकरणजन्या इत्यर्थः। तेन न भागासिद्धिर्न वा सिद्धसाधनम्। न चात्र मानसोपनीतरससाक्षात्कारे व्यभिचारः, लौकिकापरोक्षप्रतीतिहेतुत्वात्। अनन्तरमेवेति। काठिन्यापगमानन्तरं जलत्वप्रतीतेरबाधितत्वाज्जलत्वसिद्धिरिति भावः ॥

रसात्यन्ताभावसमानाधिकरणरूपाधिकरणं तेजः।

रूपाधिकरणं तेज इत्युक्ते पृथिव्यादौ गतम्, अतः समानाधिकरणान्तं रूपविशेषणम्। रसात्यन्ताभावश्च रसत्वावच्छिन्नात्यन्ताभावो विवक्षितः। तेन न यत्किञ्चिद्रसात्यन्ताभावमादाय जलादावतिप्रसङ्गः। अधिकरणत्वं च समवायेन विवक्षितम्। तेन न कालादावतिप्रसङ्गः। न चोत्पन्नविनष्टतेजसि अव्याप्तिः, तत्र मानाभावात्। तादृशरूपाधिकरणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वे वा तात्पर्यम्। एतदस्वरसादेव [लक्षणान्तरम्] आह—

करकाऽवृत्तिविद्युदाकरजवृत्तिजातिमद्वा।

द्रव्यत्वसत्त्वे आदाय पृथिव्यादावतिव्याप्तिवारणाय करकाऽवृत्तीति। [1][घटत्वादि]वारणायाकरजवृत्तीति। सुवर्णत्ववारणाय विद्युद्ग्रहणम्[2]। विद्युदाकरजान्यान्यत्ववारणाय जातीति।

---

१ जलत्व° इति मातृकापाठः। २ सत्तावारणाय करकाऽवृत्तीति अधिकमत्र मातृकायाम्।

नन्वाकरजस्य पार्थिवत्वात् [१]तद्वृत्तित्वं तेजस्त्वजातेर्न संभवतीत्यत आह—

विद्युत्करकावृत्तित्वरहिताकरजवृत्तिजातिमती विद्युद्व्यतिरिक्ता-करजान्यत्वरहितत्वात्, आकरजवत्। आकरजं सुवर्णादिः।

ननु सुवर्णादिकं पार्थिवं नैमित्तिकद्रवत्वात्, घृतवदित्यनेन पार्थिवत्वसिद्धेराकरजवृत्तिजातिमत्त्वसाधनेऽपि विद्युत्तेजसो न तेजस्त्व-सिद्धिरिति चेत्—न, स्वर्णादिकमपार्थिवम्, अत्यन्ताग्निसंयोगेऽनु-च्छिद्यमानद्रवत्वाधिकरणत्वादित्यनुमानेनापार्थिवत्वसिद्धावसांसिद्धिक-द्रवत्वेन तत्सिद्धिः। अन्यथा पार्थिवद्रवत्वमत्यन्ताग्निसंयोगे उच्छिद्यतीति तर्कोऽनुसरणीयः॥

विद्युत्त्वमादाय सिद्धसाधनतावारणायाकरजवृत्तीति। सत्तामादाय तद्वारणाय रहितान्तं जातिविशेषणम्। यत्किञ्चिद्रहितत्वं जलादौ गतम्, तद्वार-णायाकरजान्यत्वेति। असिद्धिवारणाय विद्युद्व्यतिरिक्तेति। पक्षे च विद्युद्व्य-तिरिक्त[त्व]विशिष्टमाकरजान्यत्वं नास्तीति भावः। विशिष्टाभावे च न वैयर्थ्यम्। [5b] व्याप्तिग्रहस्था[प]नार्थमाकरजान्यत्वेति। विपक्षबाधकमाह — अन्यथेति।

तच्च द्विविधम् नित्यमनित्यं चेति।

नित्यं तेजः साधयति—

तेजस्त्वं नित्यवृत्ति, विद्युदाकरजवृत्तिजातित्वादिति नित्यत्वसिद्धिः।

स्वर्णत्ववारणाय विद्युदिति। विद्युत्त्ववारणायाकरजेति। न चोभय-वृत्तिद्वित्वादौ व्यभिचारः, जातित्वस्यापि विशेषणत्वात्।

---

१ तद्वृत्तिवत्तेजस्त्वं इति मातृकापाठः।

पक्षसिद्धिं वारयति,

साधितं च तेजस्त्वम्। अनित्यं त्रिविधं शरीरादिभेदेन। शरीरमादित्यलोके। तस्यापार्थिवत्वसिद्धिः पूर्ववत्[१]। इन्द्रियं रूपोपलम्भकम्। रूपोपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावदिति तत्सिद्धिः। कर्तृप्रेर्यं करणं धातुवाच्यव्यापारेण। चक्षुस्तैजसं रूपादिषु मध्ये तस्यैवाभिव्यञ्जकत्वात्, आलोकवत्। विषयस्तु भौमादिरिति तेजः ॥

पूर्ववदिति। तेजःपरमाणवः पारम्पर्येण शरीरारम्भकाः इन्द्रियारम्भकत्वात् पार्थिवपरमाणुवदिति भावः। करणेति असाधारणकरणे[ने]त्यर्थः। कर्तृप्रेर्यमिति। कर्तृसंपाद्यमानक्रियानुकूलव्यापारशालित्वमित्यर्थः। यथा देवदत्तसंपादितज्वलनादिव्यापारशालिकाष्ठादि पचिक्रियाकरणमिति। एतच्च स्वरूपकथनम्। वस्तुतः करणत्वं स्वरूपसंबन्धविशेष एवेत्याहुः। ननु क्रियात्वं कर्मत्वम्, तच्च स्वरूपासिद्धमित्यत आह-धातुवाच्येति। पचिधातोः पचिक्रियावद् जानातेर्धातोर्ज्ञानक्रियापि वाच्येति भावः ॥

रूपात्यन्ताभावसमानाधिकरणस्पर्शवान् वायुः। विप्रतिपन्नस्पर्शः रूपरहितद्रव्यवृत्तिः, स्पर्शत्वरहिततच्छब्दान्यत्वरहितत्वात् शब्दवत्।

वायुलक्षणं स्पष्टम्। वायुसद्भावे मानमाह—विप्रतिपन्नेति। घटादिस्पर्शमादायांशतो बाधवारणायेदम्। पृथिवीवृत्तित्वेनार्थान्तरवारणाय रूपरहितेति। उद्देश्यसिद्धये द्रव्यपदम्। स्पर्शत्वेति स्पर्शत्वरहितं च तच्छब्दान्यच्च। तस्य भावस्तत्त्वं तद्रहितत्वादित्यर्थः। स्पर्शत्वाभावविशिष्टशब्दान्यत्वात्यन्ताभाववत्त्वं फलितोऽर्थः। असिद्धिवारणाय विशिष्टान्तमन्यत्वविशेषणम्। एवं च पक्षे विशेषणाभावाद् दृष्टान्ते च विशेष्याभावाद् विशिष्टाभावो बोध्यः।

वायोर्नित्यत्वं साधयति,

---

१ पूर्ववदिति टीकानुरोधात्।

वायुत्वं नित्यवृत्ति, नित्यवृत्तित्वरहितवायुत्वान्यत्वरहितत्वात् पृथिवीत्ववत्, इति नित्यवायुसिद्धिः ।

नित्यवृत्तित्वेति । नित्यवृत्तित्वरहितं यद् वायुत्वान्यत् तत्त्वरहितत्वात् नित्यवृत्तित्वात्यन्ताभावविशिष्टवायुत्वान्यत्वात्यन्ताभाववत्त्वादित्यर्थः । दृष्टान्तासिद्धिवारणाय विशिष्टान्तम् । एवं च विशेषणाभावाद् विशिष्टाभावसिद्धिः । पक्षे च विशेष्याभावमादाय विशिष्टाभाव उभयवादिसिद्ध इति भावः ।

स नित्यानित्यभेदेन द्विविधः । अनित्यस्त्रिविधः शरीरादिभेदेन । वायुत्वं शरीरवृत्ति, उत्पाद्येन्द्रियवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः । स्पर्शोपलम्भकमिन्द्रियं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वात् व्यजनवदिति । विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः । प्राणस्तु शरीरान्तःप्रेरणहेतुर्वायुरिति वायुः ॥

उत्पाद्येति । घटत्वादिवारणायेन्द्रियवृत्तीति । मनस्त्ववारणायोत्पाद्येति । न चक्षुष्ट्वादौ व्यभिचारः, नीरूपत्वस्येन्द्रियविशेषणत्वात् । त्वक् चातिरिक्तत्वं च विशेषणं बोध्यम् । त्वगिन्द्रियत्ववारणाय जातिपदम् ॥

शब्दात्यन्ताभावानधिकरणं नभः । शब्दः क्वचिदाश्रितः, गुणत्वात् रूपवदिति । न च शब्दः स्पर्शवदाश्रयः स्पर्शासहकारित्वात् बुद्धिवत् । न च कालाद्याश्रयो, बाह्येन्द्रियग्राह्यत्वाद् रूपवदिति । परिशेषात् तत्सिद्धिरित्याकाशः ॥

शब्देति । व्याप्यवृत्तित्वमत्यन्ताभावविशेषणम् । तेन शब्दस्याव्याप्यवृत्तितया नासंभवः । न च[१] संयोगावच्छिन्नशब्दात्यन्ताभावाधिकरणत्वाद्संभवः, समवायावच्छिन्नशब्दात्यन्ताभावस्य विवक्षणात् । न च घटत्वात्यन्ताभावे शब्दात्यन्ताभावस्य प्रतीतेः तस्य चाधिकरणात्मकत्वात् प्रत्यक्ष-

---

१ न च चेति मातृकायाम् ।

लक्षणेऽसंभवः शब्दात्यन्ताभावत्वावच्छिन्नाधेयताप्रतियोगिकाधारतानाश्रयत्वस्योक्तत्वात् । अत्र च घटत्वात्यन्ताभावत्वावच्छिन्नाऽऽधेयता, न तु शब्दात्यन्ताभावत्वावच्छिन्ना, आकाशे शब्दो नास्तीत्यप्रतीतेः । न च शब्दद्वारकपरम्परासंबन्धेन तादृशात्यन्ताभावाधिकरणत्वादसंभवः, साक्षात्संबन्धेनाधिकरणताया उक्तत्वात् ।

केचित्तु शब्दवृत्तिविरोधिनी या शब्दात्यन्ताभावाधिकरणता तच्छून्यत्वं विवक्षितम्, घटत्वात्यन्ताभावात्मना शब्दात्यन्ताभावाधिकरणता तु न तथा । एवमन्येषामपि दोषाणां निरास इत्याहुः । परिशेषमाह- न चेति । शब्दो न च स्पर्शवदाश्रय इत्यन्वयः । न चेति । शब्दः कालादिचतुष्टयान्यतमाश्रितभिन्नः, बाह्येन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः ॥

[1]अनियतपरत्वासमवायिसमवायित्वरहितपरत्वासमवायिसमवायी मूर्तत्वरहितः कालः । गगनम् अनियतपरत्वासमवायित्वरहितमूर्तत्वरहितज्ञानसमवायित्वरहितद्रव्यान्यदमूर्तत्वादात्मवदिति तत्सिद्धिरिति कालः ॥

अनियतपरत्वेति[1] । मूर्तत्वरहितः काल इत्युक्ते गगने गतम् । तद्वारणाय परत्वासमवायिसमवायीति । एवमपि दिक्कृतपरत्वासमवायिकारणदिक्पिण्डसंयोगसमवायिन्यां दिशि गतमतो रहितान्तम् । दिशश्च नित्यनिष्ठपरत्वासमवायिसमवायित्वान्न दोषः । क्वचिदनियतपरत्वेति पाठः सुगम एव । पिण्डवारणाय मूर्तत्वरहित इति । गगनेति[2] दृष्टान्ते तादृशगगनरूपद्रव्यान्यत्वमादाय साध्यप्रसिद्धिः । पक्षे च गगनरूपद्रव्यान्यत्वस्य बाधितत्वात् कालरूपतादृशद्रव्यान्यत्वमेव सिध्यतीति भावः । अत्रात्मरूपद्रव्यान्यत्वमादाय सिद्धसाधनवारणाय ज्ञानसमवायित्वरहितेति द्रव्यविशेषणम् । शरीराद्यन्यत्वमादाय तद्वारणाय मूर्तत्वरहितेति । दिगन्यत्वेन तद्वारणाय प्रथमरहितान्तम् । उद्देश्यी-

---

१ नित्यपरत्वेति मातृकायाम् । २ गगनमिति मातृकायाम् ।

भूतकालाख्यद्रव्यसिद्धये नित्यपदं [द्रव्यविशेषणं देयम्]। अन्यथा द्रव्यान्तरमेव सिध्येत्, कालस्यापि परत्वासमवायित्वात् ॥

अनियतपरत्वासमवायिसमवायिनी मूर्तत्वरहिता दिक्। कालो विशेषगुणरहितामूर्तद्रव्यान्यः मूर्तत्वरहितत्वादाकाशवदिति तत्सिद्धिः॥

अनियतपरत्वेति कालवारणायेदम् परमाण्वादिवारणाय मूर्तत्वरहितेति। काल इति दृष्टान्ते कालमादाय साध्यप्रसिद्धिः। पक्षे च दिशमादायैव साध्यपर्यवसानमिति भावः। मनोभिन्नत्वेन सिद्धसाधनवारणाय अमूर्तेति। आत्मान्यत्वेन तद्वारणाय रहितान्तम्। अप्रसिद्धिवारणाय विशेषपदम् ॥

ज्ञानात्यन्ताभावरहित आत्मा। परत्वासमवायिसमवायित्वरहितशब्दानधिकरणकार्याश्रयो वा। ज्ञानं क्वचिदाश्रितम्, गुणत्वाद् रूपवदिति तत्सिद्धिः। न च शरीरेन्द्रियाणां तदाश्रितत्वं कार्यत्वाद् घटवत्। कार्यस्य तदाश्रयत्वे 'स्वर्गार्थितया ज्योतिष्टोमाद्युपदेशो[2] न स्यात्। न च मनसस्तदाश्रयत्वं करणत्वाच्चक्षुर्वत्। स द्विविधः ईश्वरानीश्वरभेदात्। तत्रेश्वरः सर्वज्ञ एकः[3]। अङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदिति [4]तत्सिद्धिः। द्वितीयस्तु अहं प्रत्ययवेद्यः। स च नाना व्यवस्थानदर्शनादित्यात्मा[5] ॥

आत्मलक्षणं स्पष्टम्। परत्वेति। जातिनिवृत्त्यै कार्यपदम्। गगननिवृत्त्यै शब्देत्यादि। दिक्कालनिवृत्त्यै रहितान्तम्। ज्ञानासमवायिसमसमवायित्वेनाव्याप्तिनिवृत्त्यै परत्वेति। कार्यस्येति। देहादिभिन्ननित्यद्रव्यानभ्युपगमे देहादिनाशे तन्निष्ठापूर्वस्यापि विनाशेन ज्योतिष्टोमादेश्चिरकालभाविस्वर्गफलकत्वासंभवेन तद्बोधकवेदाप्रामाण्यापत्तिरिति भावः। यद्यपि परस्यात्रेष्टापत्तिः,

---

१ स्वर्गार्थिनां गयाज्योति° व २ ष्टोमादिव्यप° व ३ वाक्यमिदं नास्ति र ४ ईश्वरसि° र ५ व्यव स्थावचन र

तथापि प्रसाध्याङ्कमिदं दूषणम्। करणत्वादिति इन्द्रियत्वादित्यर्थः। व्यवस्थानदर्शनादिति। एकः सुखी एको दुःखीति व्यवस्थादर्शनादित्यर्थः॥

स्पर्शरहितत्वे सति मूर्तं मनः। विशेषगुणात्यन्ताभावाधिकरणत्वे सति मूर्तं वा। पृथिवीवृत्तिपृथिवीत्वरहितवृत्तिवृत्तित्वरहितगुणत्वव्याप्यजातिमान् विशेषगुणः। आत्मप्रतीतिः करणसाध्या, अपरोक्षप्रतीतित्वात् रूपोपलब्धिवदिति तत्सिद्धिरिति मनः॥

॥ इति द्रव्यपदार्थः समाप्तः॥

स्पर्शेति। घटादिनिवृत्त्यै सत्यन्तम्। गुणादिनिवृत्त्यै मूर्तमिति। लक्षणान्तरमाह- विशेषेति। असंभवनिवृत्त्यै विशेषपदम्। विशेषगुणत्वावच्छिन्नात्यन्ताभावविवक्षया च न विशेषाभावमादाय घटाद्यतिप्रसङ्गः। अत्यन्तपदोपादानाच्च नान्योन्याभावमादाय घटाद्यतिप्रसङ्गः। मूर्तत्वग्रहणाच्च गुणादिनिवृत्तिः। पृथिवीवृत्तीति। संख्यादिवारणाय रहितान्तं गुणविशेषणम्। संख्यादिकं तु पृथिवीवृत्ति सत् पृथिवीत्वरहितवृत्त्यैवेति भावः। नन्वेवं रूपादावव्याप्तिः, न चैवं रूपं न पृथिव्यपृथिवीवृत्तीति वाच्यम्। एवं ह्येकस्य परिमाणस्योभयवृत्तित्वासंभवात् तत्रातिप्रसङ्गापत्तिरिति चेत्- अत्र वदामो रहितान्तं जातिविशेषणम्। तदर्थस्तु पृथिवीवृत्तिवृत्तित्वविशिष्टपृथिवीत्वरहितवृत्तिवृत्तित्वरहितत्वम्। परिमाणत्वादिजातिस्तु न तथा। रूपादौ च नीलत्वादिकमादाय लक्षणं बोध्यम्। स्नेहाव्याप्तिनिवृत्त्यै विशिष्टान्तम्। एवं च विशेषणाभावायत्तविशिष्टाभावसत्त्वात् स्नेहत्वजातेर्नाव्याप्तिः। आत्मत्वनिवृत्त्यै गुणत्वव्याप्येति। सुखदुःखान्यान्यत्वनिवृत्त्यै जातिपदम्। रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वानि बुद्ध्यादयः शब्दश्चेति षोडश विशेषगुणाः। इतरे सामान्यगुणाः॥

॥ इति केशवभट्टविरचितलक्षणावलीप्रकाशे द्रव्यनिरूपणम्॥

संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगासंयोगसमवेतवान् गुणः। [१]विभागाजन्यविभागासमवायिसमवेतत्वरहितविभागाविभागसमवेतो वा गुणः ॥

संयोगाजन्येति। समवेतं गुणत्वमित्युक्ते संयोगत्वे गतम्, तन्निरासार्थम् असंयोगेति। विभागत्वनिवृत्त्यै संयोगेति। सत्तानिवृत्त्यै रहितान्तम्। अव्याप्तिनिवृत्त्यै संयोगाजन्येति। विभागाजन्येति। व्याख्यातप्रायमेतत् ॥

रूपं संयोगाजन्यसंयोगासमवायिसमवेतत्वरहितसंयोगसमवेतवत्, रूपत्वरहितसंयोगाजन्यत्वरहितत्वात् संयोगवदिति गुणत्वसिद्धिः। स चतुर्विंशतिप्रकारो रूपादिभेदेन ॥

रूपत्वेन सिद्धसाधननिवृत्त्यै संयोगपदम्। सत्तामादाय तद्वारणाय रहितान्तम्। संयोगाजन्यत्वानुपादाने चोद्देश्यासिद्धिः। गुणत्वस्य संयोगासमवायिसंयोगसमवेतत्वात्। दृष्टान्ते संयोगत्वमादाय साध्यप्रसिद्धिः। पक्षे गुणत्वमादाय साध्यपर्यवसानम्। असिद्धिवारणाय हेतौ रूपत्वरहितेति। पक्षे संयोगान्यत्वसत्त्वेऽपि रूपत्वाभावविशिष्टं तन्नास्तीति विशिष्टाभावसिद्धिः। दृष्टान्ते च विशेष्याभावाद् विशिष्टाभाव इति भावः ॥

रसासमवेतनीलपीतसमवेतवद् रूपम्। गुणत्वे सति चक्षुर्ग्राह्यं रूपम्। न च रूपग्राहकं चक्षुः, चक्षुर्ग्राह्यं रूपमित्यन्योन्याश्रयः नयनगोलकाधिष्ठानत्वेन चक्षुर्निरूपणात्। [२]शुक्लो रसासमवेतवान् नीलत्वरहितशुक्लान्यत्वरहितत्वात् नीलादिवदिति नीलरूपत्वसिद्धिः। नीलः स्वमात्रसमवेतवान् रसमात्रसमवेतरहितनीलान्यत्वरहितत्वात् घटवदिति नीलत्वजातिसिद्धिः। नीलत्वरहितघटत्वात्यन्ताभावत्वरहितः स्वपदार्थः।

---

१ मुद्रितमूले पाठोऽयं नोपलभ्यते। २ शुक्लरसासमवेतनीलसमवेत नीलत्वरहितशुक्ला° र

रसासमवेतेति गुणत्वसत्तानिवर्तनायेतरत्। नीलत्वनिवृत्त्यै नीलपीतपदे। लक्षणान्तरमाह—गुणत्वे सतीति। रूपत्ववारणाय सत्यन्तम्। संयोगादिनिवृत्त्यै मात्रपदं देयम्। नन्वतीन्द्रियरूपाव्याप्तिरिति चेत्—अत्राहुः चक्षुर्मात्रग्राह्यजातिमत्त्वस्य विवक्षितत्वान्न दोषः। न चैवं सत्यन्तवैयर्थ्यम्—प्रभावारकत्वात्। न च मनोग्राह्यत्वादसंभवः, चक्षुरन्यबहिरिन्द्रियजलौकिकप्रत्यक्षाविषयचक्षुर्ग्राह्यजातिमान् गुणो रूपमित्यत्र तात्पर्यात्। गोलकेति। रूपमात्रग्राहकत्वं लक्षणं नोच्यते, किन्तु गोलकाधिष्ठानकत्वमिति नान्योन्याश्रय इत्यर्थः। वस्तुतश्चक्षुष्ट्वं जातिरेवेति नान्योन्याश्रयगन्धोऽपीति ध्येयम्। शुक्ल इति। शुक्लत्वेन सिद्धसाधनं मा भूदिति नीलपदम्। सत्तया तन्मा भूदिति रसासमवेतेति। हेतौ दृष्टान्तासिद्धिनिवृत्त्यै रहितान्तम्। नीले तु नीलत्वाभावविशिष्टशुक्लान्यत्वं नास्तीति भावः। नील इति। सत्तादिना सिद्धसाधनवारणाय साध्ये मात्रपदम्। दृष्टान्तीभूतरसे हेत्वसिद्धिनिवृत्त्यै रसमात्रसमवेतत्वरहितेति, रसे तु तादृशरसत्वाभावविशिष्टं नीलान्यत्वं नास्तीति भावः। ननु स्वपदं यदि नीलपरं दृष्टान्तासिद्धिः, यदि रसपरं बाध इत्यत आह—नीलत्वरहितेति। नीलत्वाभावविशिष्टो यो रसत्वात्यन्ताभावः, तद्रहितं नीलं भवति, रसश्च भवतीति भावः॥

रसनग्राह्यो गुणो रसः। स षोढा माधुर्यादिभेदेन। क्षीरेक्षुगुडतैलेषु माधुर्यस्य साम्येऽपि अवान्तरजातिभेदस्य विद्यमानत्वात् विशेषगुणत्वसिद्धिः॥

यद्यपि यथाश्रुतमतीन्द्रियरसाव्याप्तम्, जातिगर्भविवक्षायां तु सत्तामादाय रूपाद्यतिप्रसङ्गः, तथापि रसनमात्रग्राह्यजातिमत्त्वे तात्पर्यम्। गुणपदं तु स्वरूपकथनाय। ननु रसे रसत्वजातिमादाय न विशेषगुणलक्षणानुवृत्तिः। रसत्वजातेः पृथिव्यपृथिवीवृत्तिरसवृत्तित्वादवान्तरमधुरत्वमादायापि न संगतिरित्याशङ्क्य क्षीरादिप्रत्येकरसमात्रवृत्तिमधुरत्वावान्तरजातिभेदमादाय लक्षणसंगतिरित्याह-क्षीरेति॥

गुणत्वे सति घ्राणग्राह्यो[२] गन्धः। जलादावौपाधिकी गन्धप्रतीतिः, न स्वभावत इति विशेषगुणत्वसिद्धिः। जलं न गन्धाधिकरणमपाकजरूपाधिकरणत्वात् तेजोवत्। वायोः पक्षतुल्यत्वान्न व्यभिचारः॥

गुणत्वे सतीति। व्याख्यातप्रायमेतत्। ननु गन्धस्य पृथिवीतदितरवृत्तित्वाद् गन्धत्वमादाय न गन्धे विशेषगुणलक्षणानुवृत्तिरित्यत आह—जलादाविति। जलमिति हेतौ पृथिवीनिवृत्त्यै अपाकजेति। यद्यपि यथाश्रुतो हेतुः पृथिव्यां व्यभिचारी, अपाकजस्यापि रूपस्य तद्वृत्तित्वात्, तथापि पाकजरूपजननस्वरूपायोग्यत्वे तात्पर्यम्। पृथिवीत्वानधिकरणत्वे वा तात्पर्यम्। अत एवाह—वायोरिति॥

गुणत्वे सति त्वगिन्द्रियमात्रग्राह्यः[३] स्पर्शः। स त्रिविधः, शीतोष्णानुष्णाशीतभेदात्। नन्वनुष्णाशीतस्य न विशेषगुणत्वम्, तस्य पृथिवी[४]वायुसाधारणत्वात्। पाकजत्वापाकजत्वाभ्यामवान्तरजातिभेदेन विशेषगुणत्वे नैमित्तिकद्रवत्वस्याप्यत्यन्ताग्निसंयोगे सत्युच्छेदानुच्छेदाभ्यामवान्तरजातिसद्भावेन विशेषगुणता स्यात्। ततश्च नैमित्तिकद्रवत्वस्य सामान्यगुणपाठो निरर्थकः स्यात्। सेयमुभयतःपाशा रज्जुः। मैवम्—अवान्तरजातिभेदस्येक्षुक्षीरमाधुर्यादिवदनुभवसिद्धत्वात्, अन्यथा महान्धकारे स्पर्शोपलम्भमात्रेण वायुर्वातीति प्रत्ययो न स्यात्। न चैवं सति नैमित्तिकद्रवत्वस्यावान्तरजातिभेदानुभवः। वायुस्पर्शः पृथवीवृत्तिवृत्तिपृथिवीत्वरहितवृत्तिवृत्तित्वरहितगुणत्वव्याप्यजातिमानपाकजस्पर्शत्वात्, तेजःस्पर्शवदित्यनुमानात्॥

---

१ गुणत्वे सतीति ग पुस्तकपाठोऽपि। २ घ्राणग्राह्यो गुणो ग ३ मात्रेति नास्ति व ४ °साधारणत्वापाकजापाकजत्वाभ्या° ग

गुणत्वे सतीति। अत्रापि त्वगिन्द्रियमात्रग्राह्यजातिमत्त्वस्यावश्यकत्वे सत्यन्तं स्वरूपकथनमात्रम्। यद्वा, गुणस्य भावो गुणत्वमिति व्युत्पत्त्या तत्पदमहिम्नैव जातिगर्भविवक्षा लभ्यते, इन्द्रियपदवैयर्थ्याच्च व्यर्थं सत् किञ्चिज् ज्ञापयतीति न्यायेनेन्द्रियपदमेव मात्रगर्भत्वमावेदयतीति बोध्यम्। ननु पाकज-स्पर्शमात्रवृत्तिपाकप्रयोज्यजातिभेदमादाय लक्षणानुवृत्तिरित्याशङ्क्याह—पाकज-त्वेति। अवान्तरजातिभेदस्येति। अनुष्णाशीतस्पर्श इति शेषः। अन्यथेति। वायुस्पर्शमात्रवृत्तिजातिविशेषानङ्गीकार इत्यर्थः। स्पर्शवैजात्यं विना तदाश्रय-विशेषप्रतीतिर्नेति भावः। नैमित्तिकद्रवत्वे तु जातिभेदे न किञ्चित् प्रमाण-मित्याह—न चैवमिति। यद्यपि चिन्तामण्यादिग्रन्थपर्यालोचनया सुवर्ण-द्रवत्वमात्रनिष्ठजातिविशेषः प्रमाणसिद्धः, तथापि नैमित्तिकद्रवत्वभिन्नत्वं विशेषगुणलक्षणे विशेषणं देयम्। साम्प्रदायिकानां तत्र विशेषगुणत्वाभाव-व्यवहारस्यैवैतद्विशेषणदाने बीजत्वात्। अतएवात्मविशेषगुणान्यत्वे सतीत्या-देरसमवायिकारणलक्षणानुप्रवेश इति युक्तमुत्पश्यामः। वायुस्पर्शे यथोक्त-विशेषगुणत्वं साधयति- वायुस्पर्श इति। हेतावपाकजपदं संपातायातं स्पर्श-विशेषस्यापि विशेषगुणत्वेन व्यभिचाराभावात्। यद्वा वायुस्पर्शः पृथिवी-वृत्तिवृत्तित्वरहितजातिमानिति साध्याभिप्रायेणापाकजस्पर्शानैकान्त्यवारणायापा-कजपदम्, तावतापि वायुस्पर्शमात्रवृत्तिजातिसिद्धावभीष्टसिद्धेः। दृष्टान्तीभूतस्पर्शे चोष्णत्वजातिमादाय साध्यनिर्वाहः॥

पृथक्त्वासमवेतसर्वान्योन्याभावसमानाधिकरणैकद्रव्यसमवेतसम-वेतवती संख्या।

आदाविन्द्रियसन्निकर्षघटनादेकत्वसामान्यधी-
रेकत्वद्वयगोचरा मतिरतो द्वित्वं ततो जायते।
द्वित्वत्वप्रमितिस्ततोऽपि परतो द्वित्वप्रमानन्तरं
द्वे द्रव्ये इति धीरियं निगदिता द्वित्वोदयप्रक्रिया॥

पृथक्त्वासमवेतेति। द्वित्वसमवेतं संख्यात्वमित्युक्ते द्वित्वत्वे गतमत

एकपदम्। एकत्वत्वनिवृत्त्यै द्वेकपदम्। सत्तानिवृत्त्यै पृथक्त्वासमवेतेति।

प्रसङ्गाद् द्वित्वोत्पत्तिं व्युत्पादयति—आदाविति। प्रथमं प्रत्यक्षेणैकत्व-निर्विकल्पकम्। तदनन्तरमेकत्वविशिष्टधीः। ततो द्वित्वोत्पत्तिः। तदनु द्वित्वनिर्विकल्पकम्। ततो द्वित्वविशिष्टज्ञानम्। तदनु विशेषणतावच्छेदक-प्रकारकज्ञानजन्यं द्वे द्रव्य इति विशिष्टज्ञानं भवतीत्यर्थः। न चापेक्षाबुद्धि-नाशेन द्वित्वनाशे विषयाभावादिदं ज्ञानं न संभवतीति वाच्यम्, अपेक्षाबुद्धेश्चतुर्थ-क्षण एव नाशाभ्युपगमादित्यन्यत्र मत्कृतौ विस्तरः॥

संख्यासमवेतत्वरहितसंख्यासमवायिसमवेतसमवेतवत् परिमाणम्॥

संख्यासमवेतत्वेति। संख्यासमवायिकारणकसमवेतत्वं संख्यात्वे गतमतो रहितान्तम्। संख्यासमवेतत्वरहितत्वं संयोगत्वादौ गतम्, अतो विशेष्यभागः।

शब्दासमवायिकारणसमवेतत्वरहितसर्वान्योन्याभावसमानाधि-करणसमवेतपरिमाणासमवायिसमवेतत्वरहिताधिकरणं पृथक्त्वम्॥

शब्दासमवायिकारणेति। समवेतत्वरहितं पृथक्त्वमित्युक्तेऽसंभवः, ततः परिमाणासमवायीति। तादृशं संख्यापरिमाणादिकं तत्समवेतत्वं तु नास्त्ये-वेति भावः। एवमपि रूपत्वे गतम्, अतः सर्वान्योन्याभावसमानाधिकरण-समवेतेति रहितविशेषणम्। कालस्य जगदाधारतया सकलान्योन्याभावाधि-करणं कालः। सोऽधिकरणं यस्येति कालसमवेतसमवेतत्वं पर्यवस्यति। रूपत्वं तु न तथेति भावः। एवमपि विभागत्वे गतम्। अतः प्रथमरहितान्तं रहित-विशेषणम्। विभागस्य तु शब्दासमवायिकारणविभागसमवेतत्वान्न दोषः। संयोगत्वस्य परिमाणासमवायिसंयोगसमवेतत्वेन पदान्तरवारितस्यानेनापि निवारणं बोध्यम्॥

विभागासमवेतात्क्षणिकेतरभावविरोध्यभावेतराभावा[1]विरोधिसम-वेतप्रध्वंसप्रतियोगित्वानधिकरणसमवेतत्वानधिकरणगुणत्वसाक्षाद्व्या-

---

१ टीकानुसारेणात्र पाठः कल्पितः।

ष्यजात्यधिकरणं संयोगः । विभागासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान् वा संयोगः ॥

[विभागासमवेता][1] क्षणिकेति गुणत्वसाक्षाद्व्याप्यजातित्वमात्रं ज्ञानत्वादौ गतम्, अतः प्रध्वंसप्रतियोगित्वेत्यादि । ज्ञानत्वस्य तु प्रध्वंसप्रतियोगित्वानधिकरणेश्वरज्ञानसमवेतत्वाधिकरणत्वान्न दोषः । एवमपि गन्धत्वादौ गतम्, अतोऽभावाविरोधिसमवेतेति जातिविशेषणम् । एवमपि प्रतियोगितया गन्धनाशकगन्धसमवेतत्वेन गन्धत्वादावेव गतमिति अक्षणिकेतरेति भावविशेषणम्, गन्धादिस्तु न क्षणिक इति भावः । प्रकृते तु क्रियालक्षणाक्षणिकेतरभावविरोधिसंयोगसमवेतत्वमस्तीति ध्येयम् । न चैवमपि शब्दनाशकशब्दसमवेतशब्दत्वेऽतिप्रसङ्गः, भावपदस्य शब्देतरभावपरत्वात् ॥

संयोगासमवेतसर्वान्योन्याभावसमानाधिकरणसमवेतशब्दासमवायिसमवेतवान्, संयोगासमवेतसंख्यात्वादिचतुष्टयान्यकालवृत्तिवृत्तिगुणत्वव्याप्यजातिमान् वा विभागः ॥

संख्यात्वादिचतुष्टयान्यत्वे सति कालवृत्तिवृत्तिगुणत्वव्याप्यजातिः संयोगत्वमित्यतः संयोगासमवेतेति । समवेता जातिर्विभागत्वमित्युक्ते रूपत्वादौ गतम्, अतः शब्दासमवायीति । रूपत्वं तु न शब्दासमवायिकारणसमवेतम् । विभागत्वं तु तथा, विभागस्य शब्दासमवायिकारणत्वात् । एवमपि शब्दत्वे गतम्, अतः सर्वान्योन्याभावेत्यादि । कालसमवेतसमवेतसमवेतत्वं पर्यवसितोऽर्थः । शब्दत्वं तु न तथा, शब्दस्य कालासमवेतत्वात् । संयोगत्वनिवृत्त्यै संयोगासमवेतेति ॥

विशेषणतया परप्रत्ययनिमित्तं परत्वम् ॥

विशेषणतयेति । परत्वव्यवहारत्वावच्छिन्नकार्यतानिरूपितज्ञानवृत्तिकारणतावच्छेदकविषयो गुणः परत्वमित्यर्थः । एवमग्रेऽपि ॥

---

१ बन्धनीस्थो भागो मूलानुसारेण कल्पितः ।

विशेषणतयाऽपरप्रत्ययनिमित्तमपरत्वम् ॥

अर्थप्रकाशो बुद्धिः ॥

अर्थेति। न चात्रार्थपदं व्यर्थम्, यथाश्रुतस्य आत्माश्रयग्रस्ततया प्रकाशपदस्य प्रकाशपदवाच्यत्वपरतया प्रदीपप्रभादिनातिप्रसङ्गवारणाय तद्दानात्। तथा चार्थविषयकप्रकाशपदवाच्यत्वं लभ्यते। प्रभादेस्तु निर्विषयत्वान्न दोषः। यद्यपि व्यापारानुबन्धितया अर्थविषयकत्वं तत्राप्यस्ति, प्रतिपत्त्यनुबन्धिविषयतागर्भत्वे तु प्रकाशपदवैयर्थ्यम्, तथाप्यर्थपदं स्पष्टार्थम्। ज्ञानप्रकाशोभयपदवाच्यत्वे तात्पर्यम्। यदि च प्रथमचरमाश्रमभेदेन शरीरेऽपि तादृशपदद्वयवाच्यत्वानभ्युपगमः, तर्हि पदत्रयवाच्यत्वं लक्षणं बोध्यम् ॥

यस्मिन् सत्यनुरागः, तत् सुखम् ॥

यद्यप्यनुरागविषयत्वं सुखसाधनीभूताङ्गनालिङ्गनाद्यतिप्रसक्तम्, तथापि अन्येच्छानधीनेच्छाविषयो भावः सुखमिति तात्पर्यार्थ इत्याहुः।

यस्मिन् सति द्वेषस्तद् दुःखम् ॥

एवं द्वेषाप्रत्युक्तद्वेषविषयत्वे तात्पर्यम् ॥

प्रार्थना इच्छा ॥

ज्वलनात्मको द्वेषः ॥

उत्साहः प्रयत्नः ॥

प्रयत्न इति। कृत्युत्साहपदद्वयवाच्यः प्रयत्न इत्यर्थः ॥

आद्यपतनासमवायिकारणं गुरुत्वम् ॥

आद्यपतनेति। अदृष्टादिनिवृत्त्यर्थमसमवायीति। रूपादिनिवृत्त्यै पतनेति। उत्तरपतनासमवायिकारणवेगनिवृत्त्यर्थम् आद्यपदम् ॥

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् ॥

आद्यस्यन्दनेति। वेगनिवृत्त्यर्थमाद्यपदम्।

पृथिवीवृत्तित्वरहितात्मगुणावृत्तिशब्दावृत्तिगुणत्वसाक्षाद्व्याप्यजातिमान् स्नेहः॥

पृथिवीवृत्तीति। जातिः स्नेहत्वमित्युक्ते द्रव्यत्वादौ गतम्, अतो गुणत्वव्याप्येति। एवमपि शीतत्वादौ गतम्, अतः साक्षाद्व्याप्येति। शब्दत्वनिवृत्त्यै शब्दावृत्तीति। ज्ञानत्वनिरासार्थमात्मगुणावृत्तीति। गन्धत्वनिवृत्त्यै रहितान्तम्॥

[1]स च सङ्ग्रहादिहेतुः॥

लक्षणान्तरमाह--स चेति। संग्रहादिहेतुश्च स इत्यन्वयः। द्रवत्वभिन्नत्वे सति संग्रहासाधारणकारणत्वे तात्पर्यम्। तेन न द्रव्यत्वादृष्टाद्यतिप्रसङ्गः। न च सांसिद्धिकद्रवत्वादेव संग्रहोपपत्तौ न स्नेहस्य हेतुत्वमिति वाच्यम्, चिक्कणतोत्कर्षेण संग्रहोत्कर्षात्॥

गगनसमवेतसमवेतत्वरहितमूर्तामूर्तसमवेतत्ववान् संस्कारः।

गगनेति। रूपत्वनिरासार्थममूर्तेति। आत्मत्वनिवृत्त्यै मूर्तेति। सत्तानिवृत्त्यै रहितान्तम्॥

विहितक्रियासाध्यपुंगुणो धर्मः॥

विहितेति ध्वंसवारणाय गुणपदम्। न च तीर्थगमनादिक्रियासाध्यान्तरालिकदुःखेऽतिप्रसङ्गः विहितक्रियात्वेन जनकत्वस्य विवक्षितत्वात्। अतएव न [2]सुखत्वेनातिव्याप्तिः, सुखत्वेन विहितक्रियात्वेन कार्यकारणभावाभावात्, पुत्रेष्ट्यादौ सुखहेतुत्वे मानाभावात्, दर्शपूर्णमासादाविवात्र सुखजनकत्वबोधकविधेरभावात्, पुत्रकामो यजेतेत्यनेन पुत्रस्यैव फलत्वावगमात्। पुत्र-

---

१ मुद्रितमूलेऽयं पाठो नास्ति, रपुस्तके संग्रहादिहेतुरित्येव।

२ सुखेऽतिव्याप्तिरिति मातृकायाम्।

जन्यसुखं पुत्रेष्टिसाध्यापूर्वसाध्यम्, पुत्रेष्टिस्त्वपूर्वेणैवान्यथासिद्धा, दर्शादौ तु स्वर्गकारणताबोधकविधिप्रामाण्यान्नापूर्वेणान्यथासिद्धिरिति दिक् ॥

निषिद्धक्रियासाध्यगुणोऽधर्मः ॥

निषिद्धेति । न च परकीयाङ्गनालिङ्गनजन्यसुखेऽतिप्रसङ्गः, निषिद्धक्रियात्वेन जनकत्वस्योक्तत्वात् ॥

[1]गुणत्वे सति श्रोत्रग्राह्यः शब्दः ॥

गुणपदमुभयत्र स्पष्टार्थम् । गुणत्वे सतीति, शब्दत्वनिवृत्त्यै सत्यन्तम् ॥

॥ इति भट्टकेशवविरचिते लक्षणावलीप्रकाशे गुणपदार्थः ॥

संयोगासमवेतसंयोगासमवायिसमवेतवत् कर्म ॥

संयोगेति । रूपत्वनिवृत्त्यै संयोगासमवायिसमवेतेति, रूपत्वं तु न तथा, रूपस्य संयोगासमवायित्वाभावात् । कर्मत्वं तु तथा, कर्मणः संयोगसमवायित्वात् । संयोगत्वनिवृत्त्यै संयोगासमवेतेति ॥

तच्च पञ्चविधम्—उत्क्षेपणादिभेदेन ॥

तत्राधोदेशविभागोर्ध्वदेशसंयोगजनकं कर्मोत्क्षेपणम् ॥

ऊर्ध्वदेशविभागोऽधोदेशसंयोगजनकं कर्मापक्षेपणम् ॥

अग्रदेशविभागमूलदेशसंयोगजनकं कर्माकुञ्चनम् ॥

मूलदेशविभागाग्रदेशसंयोगजनकं कर्म प्रसारणम् ॥

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणं च प्रयत्नजन्यमिष्टम्, नचेत् गमनस्यापि प्रसङ्गात् ॥

---

१ मुद्रितमूले रपुस्तके च श्रोत्रग्राह्यो गुणः शब्दः इति पाठः, अयं तु टीकानुसारं कल्पितः ॥

अप्रयत्नजं कर्म गमनम् ॥

ननु पञ्चैव कर्माणीति नोपपद्यते, भ्रमणादीनां सत्त्वादिति चेत्-न, भ्रमणादयो गमनविशेषा इत्युक्तं [1]शास्त्रकृद्भिरिति ॥

॥ इति कर्मपदार्थः ॥

समवेतरहितसर्वान्योन्याभावसमानाधिकरणं समवेतं सामान्यम् ॥

समवेतं सामान्यमित्युक्ते । विशेषातिप्रसङ्ग इति सर्वान्योन्याभावसमानाधिकरणमिति । सर्वपदं स्वाश्रयपरम्, विशेषस्य चैकमात्रवृत्तित्वेन स्वाश्रयान्योन्याभावसमानाधिकरणत्वाभावात् । सामान्यस्य तु घटत्वादेः स्वाश्रयीभूतयत्किञ्चिद्व्यक्तिभिन्नव्यक्त्यन्तरे सत्त्वान्न दोषः । संयोगवारणाय रहितान्तम् ॥

॥ इति सामान्यम् ॥

समवेतवत्त्वरहिताः सर्वान्योन्याभावसामानाधिकरण्यरहिताः समवेताः विशेषाः ॥

समवेतवत्त्वेति । अत्रापि सर्वपदं स्वाश्रयपरम् । सामान्यनिवृत्त्यै द्वितीयरहितान्तम् रूपादिनिवृत्त्यै प्रथमरहितान्तम् रूपादिप्रध्वंसनिवृत्त्यै समवेतपदम् ॥

॥ इति विशेषपदार्थः ॥

नित्यसंबन्धः समवायः । समवेतत्वरहितसर्वान्योन्याभावसमानाधिकरणभावो वा ॥

---

१ प्रशस्तपादाचार्यादिभिः ।

नित्य इति। यद्यप्यनागतसाक्षात्कारजनकसामान्यप्रत्यासत्त्यादौ यथाश्रुतमतिप्रसक्तम्, तथापि स्वावृत्तित्वे सति स्वाभिन्नत्वावच्छिन्नवृत्तित्वं समवायत्वमित्यत्र तात्पर्यम्। भावत्ववारणाय सत्यन्तम्। असम्भववारणाय स्वाभिन्नेति। घटत्व वारणार्थमवच्छिन्नत्वभागः। भावत्वं त्वखण्डोपाधिरिति ध्येयमित्याहुः। वस्तुतस्तु समवायत्वमखण्डोपाधिरिति ध्येयम्॥

॥ इति समवायपदार्थः॥

॥ इति भावपदार्थः॥

---

[१]नञर्थप्रत्ययविषयोऽभावः। स चतुर्धा भिद्यते। प्रागभावः प्रध्वंसाभावोऽन्योन्याभावोऽत्यन्ताभावश्चेति॥

उत्तरकालावधिरभावः प्रागभावः॥

पूर्वकालावधिरभा : प्रध्वंसाभावः॥

तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः॥

उभयावधिरहितः संसर्गाभावोऽत्यन्ताभावः॥

॥ इति महामहोपाध्यायन्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचिता लक्षणावली समाप्ता[२]॥

नञर्थेति। यद्यपि नञर्थत्वमभावत्वमेवेति स्फुटमात्माश्रयत्वम्, तथाप्यभावत्वमखण्डोपाधिः। तदुक्तं रत्नकोशे एवमभावत्वध्वंसत्वादिकमपीति सर्वैरपि[३]निर्मथितोऽर्थः। उत्तरेति। ध्वंसप्रतियोग्यभाव इत्यर्थः। पूर्वेति। प्रागभाव तियोग्यभाव इत्यर्थः। तादात्म्येति। प्रतियोगितावच्छेदकारोपपूर्वकप्रतीतिविषयाभावोऽन्योन्याभाव इत्यर्थः। प्रतियोगितावच्छेदकासमानाधि-

---

१ °र्थविषयप्रत्यय° र २ इति हरिहरकिङ्करपरमतार्किकश्रीमदु° र

३ निर्मथित इति मातृकायाम्।

करणोऽभावोऽन्योन्याभाव इति केचित् । उभयेति । अनादिरनन्तः संसर्गाभावोऽत्यन्ताभाव इत्यर्थः ॥

॥ इत्यभावपदार्थः ॥

कृपया परिपूरिता यथा रचनैषा ज दम्बिके तथा ।
प्रचयं नयदुष्टचेतसां पुरतो मा नय पुस्तिकामिमाम् ॥
ज्येष्ठकृष्णद्वितीयायां भृगौ श्रीभट्टकेशवः ।
वाराणस्यामुमाकान्तं ग्रन्थमर्पितवानमुम् ॥

॥ इति श्रीमन्महामहोपाध्यायभट्टानन्तसुतकेशवविरचितो
लक्षणावलीप्रकाशः ॥

85
96

४. महायानसंस्कृतग्रन्थावली

			सजिल्द	अजिल्द
१.	अवदानशतकम्—	१९५८ मूल्यम्	१२.५०	१०.००
२.	ललितविस्तरः—	१९५८ मूल्यम्	१२.५०	१०.००
३.	दिव्यावदानम्—	१९५९ मूल्यम्	२०.००	१६.००
४.	मध्यमकशास्त्रम्—	१९६४ मूल्यम्	१२.५०	१०.००
५.	महायानसूत्रसंग्रहः—	१९६१ मूल्यम्	२०.००	१६.००
६.	अवदानकल्पलता प्रथमो भागः	१९५९ मूल्यम्	१२.५०	१०.००
७.	,, ,, द्वितीयो भागः	१९५९ मूल्यम्	१२.५०	१०.००
८.	सद्धर्मपुण्डरीकसूत्रम्—	१९६० मूल्यम्	१२.५०	१०.००
९.	बोधिचर्यावतारः—	१९६० मूल्यम्	१२.५०	१०.००
१०.	गण्डव्यूहसूत्रम्—	१९६० मूल्यम्	२०.००	१६.००
११.	जातकमाला—	१९५९ मूल्यम्	१२.५०	१०.००
१२.	समाधिराजसूत्रम्—	१९६१ मूल्यम्	१६.००	१२.००
१३.	शिक्षासमुच्चयः	१९६० मूल्यम्	१२.५०	१०.००

मुद्रणार्थं प्रस्तुताः ग्रन्थाः

१. विष्णुपुराणम्—सामीक्षिकं संस्करणम्
२. महावस्तु—
३. मूलसर्वास्तिवादिनां विनयः—
४. प्रज्ञापारमितासंक्षेपाः द्वितीयो भागः
५. अश्वघोषग्रन्थाः—बुद्धचरितम् सौन्दरनन्दनम् ।

मुद्रणयन्त्रस्थाः ग्रन्थाः

१. न्यायकुसुमाञ्जलिः—बोधन्यामोदविवेकादिसहितः ।
२. कुमारिलकारिकावली—कुमारिलस्वामिपादकृता ।
३. रत्नकोशमतवादार्थः—
४. सुलोचना—माधवचम्पू
५. तत्वचिन्तामणिः—आलोकदर्पणान्वितः प्रत्यक्षखण्डे द्वितीयो भागः ।
६. न्यायचतुर्ग्रन्थिका—न्यायसूत्र-भाष्य-वार्तिक-तात्पर्य-परिशुद्धिरूपा सटीका
७. शब्दरत्नाकरः—सूत्रत्रयात्मकः प्रथमः खण्डः
८. विवरणपञ्चिका—
९. लङ्कावतारसूत्रम्— मूल्यम्—१२.५०—१०.००
१०. अष्टसाहस्रिका— मूल्यम्—२५.००—२०.००
११. दशभूमिकसूत्रम्— मूल्यम्—१२.५०—१०.००
१२. प्रज्ञापारमितासंक्षेपाः— मूल्यम्—२०.००—१६.००
१३. सुवर्णप्रभाससूत्रम्—
१४. तथागतगुह्यकम्—
१५. सूत्रालंकारः—
१६. महायानस्तोत्रसंग्रहः—

15 B-05